# मूर्खभृत्यस्य

"अरे शंखनाद, गच्छापणम्, शर्कराम् आनय ।" इति स्वभृत्यम् शंखनादम् गोवर्धनदासः आदिशति ।ततः शंखनादः आपणम् गच्छति, शर्कराम् जीर्णे वस्त्रे न्यस्यति च ।तस्मात् जीर्णवस्त्रात् मार्गे एव सर्वापि शर्करा स्त्रवति ।ततः गोवर्धनदासः कोपेन शंखनादम् वदति, "अरे मूढ, कुत्रास्ति शर्करा ? शर्करादिकम् एवम् जीर्णेन वस्त्रेण न एवानयन्ति कदापि ।इतःपरम् किमपि वस्तुजातम् दृढायाम् सन्चिकायाम् निक्षिप्य आनय च " इति ।

अत्रान्तरे गोवर्धनदासस्य पुत्रः "श्वानशावकम् आनय" इति शंखनादम् आदिशति ।आज्ञापालकः शंखनादः श्वानशावकम् सन्चिकायाम् क्षिपति, सन्चिकाम् वस्त्रेण आच्छादयति च ।तेन शावकस्य श्वासः रुध्दः भवति ।सः च श्वानशावकः पञ्चत्वम् गच्छति ।तदा गोवर्धनदासः शंखनादम् अभिधावति क्रोधेनाक्रोशति च, " धिक् मुढ, श्वानादिकम् दोरकेण बद्धवा आनयन्ति इति अपि नावगच्छसि किम् ?" इति ।

ततः कदाचित् गोवर्धनदासस्य भार्या "दुग्धम् आनय" इति तस्मै कथयति ।सः आपणम् गच्छति पात्रे दुग्धम् आदाय दोरकेण बद्धवा कर्षति ।मार्गे पात्रम् लुठति ।पात्रात् दुग्धम् सर्वत्र प्रवहति ।तेन हताशः गोवर्धनदासः तम् वदति "भो महापंडित, अपसर; कृष्णम् भवतु ते मुखम् " इति ।

तदा आज्ञापालकः शंखनादः बहिः गच्छति कज्जलेन मुखम् लिम्पति ।तेन तस्य मुखम् कृष्णम् भवति ।ततः कृष्णमुखः सः प्रत्यागच्छति । गोवर्धनदासः विरुपम् तम् पश्यति आत्मानम् एव निन्दति ललाटम् हस्तेन ताडयति वदति च ।

वरम् भृत्यविहिनस्य जिवितम् श्रमपूरितम् ।
मूर्खभृत्यस्य संसर्गात् सर्वम् कार्यम् विनश्यति ॥